This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः॥ ॥ जनक उवाच॥ ॥ कथं ज्ञानमवाप्नोति
कथं मुक्तिर्भविष्यति॥ वैराग्यं च कथं प्राप्तमेतत्त्वं ब्रूहि मे प्रभो॥१॥
॥१॥ मुक्तिमिच्छसि चेत्तात विषयान्विषवत्त्यज॥ क्षमार्जवदया
तोषसत्यं पीयूषवद्भज॥२॥ न पृथ्वी न जलं नाग्निर्न वायुर्द्यौ
र्न चाप्यवान्॥ एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये॥३॥ यदि
देहं पृथक्कृत्य चिति विश्राम्य तिष्ठसि॥ अधुनैव सुखी शांतो बंध
मुक्तो भविष्यसि॥४॥ न त्वं विप्रादिको वर्णो नाश्रमी नाक्षगोच

॥१॥

K K S U LIBRARY
RAMTEK
441 106
Dist Nagpur
M 146
Checked 2012

Acc. No. ~~१०१~~ M146
Title - तत्त्वोपदेश (अपूर्ण)
Author - ?
Date - ?
Sub. - वेदान्त.
folio - 16
Xerox - 30

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रः॥ असंगोसिनिराकारोविश्वसाक्षीसुखीभव॥५॥ धर्माधर्मौ
सुखंदुःखंमानसानिनतेविभो॥ नकर्त्तासिनभोक्तासिमुक्तएवा
सिसर्वदा॥६॥ अयमेवहितेबंधोद्रष्टारंयत्स्यसीतर॥ अहंकर्त्ते
त्यहंमानमहाकृष्णाहिदंशितः॥ नाहंकर्त्तेतिविश्वासामृतंपीत्वा
सुखीभव॥ एकोविशुद्धबोधोहमितिनिश्चयवह्निना॥ प्रज्वा
ल्याज्ञानगहनं वीतशोकः सुखीभव॥ यत्रविश्वमिदंभातिकल्पि
तंरज्जुसर्पवत्॥ आनंदपरमानंदसबोधस्त्वंसुखंचर॥ मुक्ताभि

2

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानीमुक्तो हि बद्धो बद्धाभिमान्यपि॥ किंवदंती हसत्येयं यामतिः सा
गतिर्भवेत्॥ आत्मासाक्षी विभुः पूर्ण एको मुक्तश्चिदक्रियः॥ असं
गो निस्पृहः शांतो भ्रमात्संसारवानिव॥ कूटस्थं चोद्यमद्वैतमात्मानं
परिभावय॥ आभासाहंभ्रमं मुक्त्वा भावं बाह्यमथांतरं॥ देहाभिमा
नपाशेन चिरं बद्धोसि पुत्रक॥ बोधोहं ज्ञानखड्गेन तं निष्कृत्य सुखी भ
वेत्॥ निःसंगो निःक्रियोसि त्वं स्वप्रकाशो निरंजनः॥ अयमेव हि ते
बंधः समाधिमनुतिष्ठसि॥ त्वया व्याप्तमिदं विश्वं त्वयि प्रोतं यथार्थ





CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः॥ शुद्धबुद्धः स्वरूपस्त्वमागमः क्षुद्राचित्ततां॥ निरपेक्षो निर्विकारो
निर्भरः शीतलाशयः॥ अगाधबुद्धिरक्षुब्धो भवचिन्मात्रवासनः॥
॥१६॥ ॥अथसंग्रहश्लोकाः॥ ॥साकारमनृतं विद्धि निराकारं तु नि
श्चलं॥ एतत्तत्त्वोपदेशेन न पुनर्भवसंभवः॥ यथैवादर्शमध्यस्थे रूपे तं
परितस्तु सः॥ तथैवास्मिञ्छरीरेतः परितः परमेश्वरः॥ एकं सर्वगतं व्योम
बहिरंतर्यथा घटे॥ नित्यं निरंतरं ब्रह्म सर्वभूतमपे तथा॥ ३॥ ॥इ
त्युपदेशकं॥ ॥अहो निरंजनः शांतो बोधोहं प्रकृतेः परः॥ एतावं



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमहंकालं मोहेनैव विडंबितः॥१॥ यथाप्रकाशायाम्येको देहमेनंतथाज
गत्॥ अतोममजगत्सर्वमथवामेनकिंचन॥२॥ सखारी रमहोविश्वंपरि
त्यज्यमयाधुना॥ कुतश्चित्कोशलाद्देवपरमात्माविलोक्यते॥३॥ यथा
नतोयतोभिन्नास्तरंगाः फेनबुद्बुदाः॥ आत्मानोनतथाभिन्नंविश्व
मात्माविनिर्गतं॥४॥ तंतुमात्रोभवेद्देव पटोयद्वद्विचारितः॥ आत्म
तन्मात्रमेवेदं तद्वद्विश्वं विचारितं॥५॥ यथैवेक्षुरसे कृत्स्नातेन व्याप्ते
वशर्करा॥ तथाविश्वमयिकृत्स्नमया व्याप्तंनिरंतरं॥६॥ आत्माज्ञा

॥३॥

॥३॥

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाज्जगद्भाति आत्मज्ञानान्नभासते॥ रज्ज्वज्ञानादहिर्भाति तज्ज्ञाना
द्भासितेनहि॥७॥ प्रकाशोमेतिजंरूपंनातिरिक्तोस्म्यहंततः॥ यदाप्रका
शतेविश्वंतदाहंभासएवहि॥८॥ अहोविकल्पितंविश्वमज्ञानान्मयिभा
सते॥ रूप्यंशुक्तौफणीरज्जौवारिसूर्यकरेयथा॥९॥ मत्तोविनिर्गतंवि
श्वंमय्येवलयमेष्यति॥ मृदिकुंभोजलेवीचिःकनकेकटकंयथा॥१०॥
अहोअहंनमोमह्यंविनाशोयस्यनास्तिमे॥ ब्रह्मादि स्तंबपर्यंतंज
गन्नाशोपिनिश्चितः॥११॥ अहोअहंनमोमह्यंएकोहंदेहवानपि॥ क्व
चिन्नगंतानागंताव्याप्यविश्वमवस्थितः॥१२॥ अहोअहंनमोमह्यं



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रक्षो नास्ति तिमत्समः॥ असंस्पृश्यशरीरेणयेन विश्वं चिरंधृतं॥१३॥ अ
हो अहं नमोमह्यंयस्यमे नास्ति किंचन॥ अथवायस्यमे सर्वंयद्वाङ्मन
सगोचरं॥१४॥ ज्ञानं ज्ञेयं तथाज्ञाता त्रितीयं नास्ति वास्तवं॥ अज्ञाना
द्भाति यत्रेदं सोहमस्मि निरंजनः॥१५॥ द्वैतमूलमहो दुःखं नान्यत्तस्या
स्ति भेषजं॥ दृश्यमेतन्मृषासर्वमेकोहं चिद्रसोमलः॥१६॥ बोध मा
त्रोहमज्ञानादुपाधिः कल्पितोमया॥ एवं विमृश्यतो नित्यं निर्विकल्पे
स्थितिर्मम॥१७॥ अहोमयि स्थितं विश्वं वस्तुतो नमयि स्थितं॥ न
मे बंधोस्ति मोक्षोवा भ्रांतिः शांता निराश्रयः॥१८॥ सशरीरमिदं

॥४॥

॥४॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वं न किंचिदिति निश्चितं॥ शुद्धश्चिन्मात्र आत्मानं तत्कस्मिन्कल्प
नाधुना॥१९॥ शरीरं स्वर्गनरकौ बंधमोक्षौ भयं तथा॥ कल्पनामात्रमे
वैतत् किं मे कार्यं चिदात्मनः॥२०॥ अहो जनसमूहोपि तद्वैतं पश्यतो
मम॥ अरण्यमिव संवृत्तं क्व रतिं करवाण्यहं॥२१॥ नाहं देहो न मे देहो जी
वो नाहमहं हि चित्॥ अयमेव हि मे बंध आसीद्या जीविते स्पृहा॥२२॥
अहो भवनकल्लोलैर्विचित्रैरर्णवे समुत्थितं॥ मय्यनंतमहाभो
धौ चित्तवाते समुद्यते॥२३॥ मय्यनंतमहाभोधौ चित्तवाते प्रशा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्याति॥ अभाग्या जीवणिजोजगत्यो विनश्वरः॥२४॥ मय्यनंतमहांभो
धावाश्चर्यंजीववीचयः॥ उद्यंतिघ्नंतिखेलंतिप्रविशंतिस्वभावतः॥
॥२५॥ ॥इतिश्रीअष्टावक्रप्रकरणेशिष्यप्रोक्तंस्वात्मानुभवो
ल्लासंपंचविंशतिकं॥ ॥अविनाशिनमात्मानमेकंविज्ञायत
त्वतः॥ तत्वात्मज्ञस्यधीरस्यकथमर्थार्जनेरति॥१॥ आत्मा
ज्ञानादहोप्रीतिर्विषयभ्रमगोचरी॥ शुक्तेरज्ञानतोलोभोयथा
रजतविभ्रमे॥२॥ विश्वंस्फुरतियत्रेदंतरंगाइवसागरे॥ सो

॥५॥

॥५॥

9

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हमस्मीतिविज्ञाय किंदीनइवधावसि॥३॥ श्रुत्वापिशुद्धचैतन्य
मात्मानमतिसुंदरं॥ उपस्थेत्यंतसंसक्तोमालिन्यमधिगच्छति॥
॥४॥ कथंमालिन्यंमो मधिगच्छतिइतिआक्षेप॥ सर्वभूतेषुचा
त्मानंसर्वभूतानिचात्मनि॥ मुनेर्जानतआश्चर्यंममत्वमनुवर्त्त
ते॥५॥ आस्थितः परमाद्वैतंमोक्षार्थेपिव्यवस्थितः॥ आश्चर्यका
मवसगोविकलकेलिशिक्षया॥ ६॥ उद्भूतंज्ञानदुर्मित्रमवधा
र्यातिदुर्बलः॥ आश्चर्यकाममाकांक्षेत्कालमंतमनुश्रितः॥७॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इहामुत्रविरक्तस्य नित्यानित्यविचेकिनः॥ आश्चर्यमोक्षकाम
स्यमोक्षादेवविषीषिका॥ ८॥ धीरस्तु भोज्यमानोपिपीड्यमानो
॥६॥ पिसर्वदा॥ आत्मानंकेवलंपश्यन्नतुष्यतिनकुप्यति॥ ९॥ चे
ष्टमानंशरीरंस्वंपश्यत्यन्यशरीरवत्॥ संस्तवेचापिनिंदायांकथं
क्षुभ्येन्महाशयः॥ १०॥ मायामात्रमिदंविश्वंपश्यन्विगतकौतु ॥६॥
कः॥ अपिसन्निहितेमृत्यौकथंत्रस्यतिधीरधीः॥ ११॥ निस्पृ
हंमानसंयस्यनैराश्योपिमहात्मनः॥ तस्यात्मज्ञानतृप्तस्य तु

11

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लनाकेनजायते॥१२॥ स्वभावादेवजातानोदृश्यमेतन्नकिंचन॥ इ
दंग्राह्यमिदंत्याज्यंसकिंपश्यतिधीरधी॥१३॥ अंतस्त्यक्तकषा
यस्यनिर्द्वंद्वस्यनिराशिषः॥ यदृच्छयागतोभोक्तोनदुःखायन
तुष्टये॥१४॥ ॥इतिआर्षेयउपदेशकं॥ ॥हंतात्मज्ञस्यधीरस्य
खेलतोभोगलीलया॥ नहिसंसारवाहीकैर्मूढैःसहसमानता॥
॥१॥ यत्पदंप्रेप्सवोदीनाःशक्राद्याःसर्वदेवताः॥ अहोतत्रस्थितो
योगीनहर्षमुपगच्छति॥२॥ तज्ज्ञस्यपुण्यपापाभ्यांस्पर्शोह्यंतर्न



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जायते॥ नह्याकाशस्य धूमेन दृश्यमानाय संगति॥ ३॥ आत्मैवेदं ज
॥७॥ गत्सर्वं ज्ञातं येन महात्मना॥ यदृच्छया वर्त्तमानं तं निषेद्धुं क्षमेत्तकः॥ ४॥
आब्रह्मस्तंबपर्यंतं भूतग्रामे चतुर्विधे॥ विज्ञस्येव हि सामर्थ्यं
मिच्छानिच्छाविवर्जने॥ ५॥ आत्मानमद्वयं कश्चिज्जानाति जगदीश्व
रं॥ यद्वेत्ति तत्स कुरुते न भयं तस्य कुत्रचित्॥ ६॥ ॥ इत्येकाग्रसप्त
कं॥ ४॥ ॥ नते संगोस्ति केनापि किं शुद्धस्त्यक्तुमिच्छसि॥ संघा ॥७॥
तविलयं कुर्वन्नेवमेव लयं व्रज॥ १॥ उदेति भवतो विश्वं वारिधे

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिव बुद्बुदः॥ इतिज्ञात्वैकमात्मानमेवमेवलयंव्रज॥२॥ प्रत्यक्षम
प्यवस्तुत्वाद्विश्वंनास्त्यमलेत्वयि॥ रज्जुसर्पइवव्यक्तं एवमेवल
यंव्रज॥३॥ समदुःखसुखःपूर्णः आशानैराश्ययाः समः॥ समजी रा
वितमृत्युः सन्नेवमेवलयंव्रज॥४॥ ॥इतिलयपंचकं॥ ॥
आकाशवदनंतोहंघटवत्प्राकृतंजगत्॥ इतिज्ञानंतथैतस्य
नत्यागोनग्रहोलयः॥ १॥ महोदधिरिवाहंसप्रपंचोवीचिसंनि
भ॥ इतिज्ञानंतथैतस्यनत्यागोनग्रहोलयः॥२॥ अहंसमुक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥ संकाशोरूप्यवद्विश्वकल्पना॥ इति ज्ञानंतथैतस्यनत्यागोनमहो
लयः॥३॥ अहं वासर्वभूतेषुसर्वभूतान्यथोमयि॥ इति ज्ञानंत
थैतस्यनत्यागोनग्रहोलयः॥४॥ ॥इत्यरोपसकं॥ ॥मय्य
नंतमहांभोधौविश्वयोत्तइतस्ततः॥ पत्रमतिस्वांतवातेनमम
नास्त्यसहिष्णुता॥१॥ मय्यनंतमहांभोधौजगद्वीचीस्वभाव ॥८॥
तः॥ उद्देतुवास्तमयातुनमेवृद्धिर्नचक्षतिः॥२॥ मय्यनंतमहां
भोधौविश्वनामविकल्पना॥ अतिशांतोनिराकारएतदेवाह



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मास्थित॥३॥ नात्माभावेषु नोभ वास्तत्रानंतेनिरंजने॥ इत्यसक्तो
स्पृहाशांत एतदेवाहमास्थितः॥४॥ अहोचिन्मात्रमेवाहमिंद्रजालो
पमंजगत्॥ अनोममकथंपुत्रहेयोपादेयकल्पना॥५॥ ॥ इत्यक्ष
वपंचकं॥ ॥ तदाबंधोमहाचित्तंकिंचिद्वांछतिशोचति॥ किंचिन्मुंच
तिगृह्णातिकिंचिद्धर्ष्यतिकुप्यति॥१॥ तदामुक्तिर्यदाचित्तंनवांछ
तिनशोचति॥ नमुंचतिनगृह्णातिनहृष्यतिनकुप्यति॥२॥
तदाबंधोयदाचित्तंसक्तकास्वपिदृष्टिषु॥ तदामुक्तोयदाचित्तं
असक्तंसर्वदृष्टिषु॥३॥ यदानाहंतदामोक्षोयदाहंबंधनेतदा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मर्त्वेतिहेलयाकिंचिन्मागरहाणविमुंचमा॥ ४॥ कृताकृते चद्वंद्वानि
कदाशांतानिकस्यवा॥ एवंज्ञात्वेहनिर्वेदाद्भवत्यागपरोव्रती॥ ५॥
कस्यापितातधन्यस्य लोकचेष्टावलोकनात्॥ जीविने छाबुभु
क्षाचबुभुत्सोपशमंगताः॥ ६॥ अनित्यंसर्वमेवेदंतापत्रितय
दूषितं॥ असारंनिंदितंहेयमितिनिश्चित्यशाम्यति॥ ७॥ को
शौकालोवयकिंवायत्रद्वंद्वानिनोन्नणां॥ तान्युपेक्ष्ययथाप्रा
प्तवर्त्तीशिद्धिमवाप्नुयात्॥ ८॥ नानामतंमहर्षीणांसाधुनांयो
गिनांतथा॥ दृष्ट्वानिर्वेदमापन्नः कोनशाम्यतिमानवः॥ ९॥

॥२॥

॥२॥

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्वामूर्त्तिपरिज्ञानंचेतनस्यनकिंगुरु॥ निर्वेदसमतायुक्तायस्ता
रयतिसंसृतेः॥१०॥ पश्यपश्चतु विकारांस्त्वपश्चतमात्रान्यथार्थतः॥
तत्क्षणाद्बंधनिर्मुक्तः स्वरूपस्थोभविष्यसि॥११॥ वासनाएवसं
सार इतिसर्वा विमुंचताः॥ तत्यागोवासना त्यागान्नस्थितिरप्य
यथातथा॥८॥ ॥ इतिनिर्वेदाष्टकं॥ ॥विहायवैरिणंकाममर्थं
वानर्थसंकुलं॥ धर्ममप्येतयोर्हेतुंसर्वत्रानादरं कुरु॥१॥ स्वप्ने
इंद्रजालवत्पश्यदिनानित्रीणिपंचवा॥ मित्रक्षेत्रधनागारदारदा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यादिसंपदः॥२॥यत्रयत्रभवेत्तस्यासंसारंविद्धितंतथा॥ प्रौढ
॥१०॥ वैराग्यमास्थायवीततस्त्रः सुखी भव॥३॥ तस्यामात्रात्मको
बंधस्तन्नाशोमोक्षउच्यते॥ भावासंसक्तिमात्रेणप्राप्तिनु
ष्टिर्मुहुर्मुहुः॥४॥त्वमेकश्चेतनः शुद्धोजडंविश्वंत्रसत्तथा॥
अविद्यापिनकिंचित्साकाबुभुत्सातथापिते॥५॥ राज्यं ॥१०॥
सुताकलत्राणिशरीराणिसुखानिच॥ संसक्तस्यापिन
ष्टानितवजन्मानिजन्मनि॥६॥ अल्पमर्थेनकामेनसुकृते



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नापिकर्मणा॥ एक्यः संसारकांतारेनविश्रांतमस्मन्मनः॥ ७॥ कृ
तंनकतिजन्मानिकायेनमनसागिरा॥ दुःखमायासदंकर्मतद
द्याप्युपरम्यतां॥ ८॥ ॥इत्यपरमाष्टकं॥ ॥भावाभावविकारश्च
स्वभावादितिनिश्चयी॥ निर्विकारोगतक्लेशः सुखेनैवोपशाम्य
ति॥ १॥ ईश्वरः सर्वनिर्मुक्तो नेहान्यइतिनिश्चये॥ अंतर्गलितस
र्वाशः शांतः क्वापिनसज्जते॥ २॥ आपदः संपदः कालेदैवादेवेति
निश्चयी॥ तृप्तःस्वस्थेंद्रियोनित्यंनवांछतिनशोचति॥ ३॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुखेदुःखेजन्ममृत्यूदैवादेवेतिनिश्चयी॥ साध्यादृष्टिरनिरायासः
कुर्वन्नपिनलिप्यते॥ ४॥ चिंतयाजायतेदुःखंनान्यथेहेतिनिश्चयी॥
तयाहीनःसुखीशांतःसर्वत्रगलितस्पृहः॥ ५॥ नाहंदेहोनमेदेहो
बोधोहमितिनिश्चयी॥ कैवल्यमिवसंप्राप्तोनस्मरत्यकृतंकृतम्॥ ६॥
आब्रह्मस्तंबपर्यंतमहमेवेतिनिश्चयी॥ निर्विकल्पःशुचिःशांत
प्राप्ताप्राप्तसुखनिर्वृतः॥ ७॥ नानाश्चर्यमिदंविश्वंनकिंचिदितिनि
श्चयी॥ निर्वासनःस्फूर्तिमात्रोनकिंचिदिवशाम्यति॥ ८॥ ॥ इति





CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री अष्टावक्रोज्ञानाष्टकप्रकरणं ॥ श्री कामकृत्यासहः पूर्वततो वा
विस्तससहः ॥ अथ चित्तासहस्तस्मादेवमेवाहमास्थितः ॥१॥ प्री
त्यभावेन शब्दादेरदृश्यतेन चात्मनः ॥ विक्षेपैकाग्रहृदय एवमेवा
हमास्थितः ॥२॥ समाध्यासादिविक्षिप्तौ व्यवहारः समाधये ॥ ए
वं विलोक्य नियममेवमेवाहमास्थितः ॥ ३॥ हेयोपादेयविरहादे
वं हर्षविषादयोः ॥ अभावादद्य रहब्रह्मन्नेवमेवाहमास्थितः ॥
॥४॥ आश्रमानाश्रमध्यानं चित्तस्वीकृतवर्जनात् ॥ विकल्पम



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मवीक्ष्येतैरेवमेवाहमास्थितः॥५॥ कर्मानुष्ठानमज्ञानाद्यथैवोप
रमस्तथा॥ बुध्वासम्यगिदंतत्वमेवमेवाहमास्थितः॥६॥ अचिं
त्यंचिंतमानोपिचिंतारूपंभजत्यसौ॥ त्यक्त्वातद्भावनंतस्मादे
वमेवाहमास्थितः॥७॥ एवमेवकृतंमेनसकृतार्थोभवेदसौ॥
एवमेवस्वभावोयः सकृतार्थोभवेदसौ॥ ८॥ ॥इतिवमेवाष्ट
कं॥१२॥ ॥ आकिंचनभवंस्वास्थ्यंकोपीनत्वेपिदुर्लभं॥त्या
गादानेविहायास्मादहमासेमथास्करवं॥ १॥ कुत्रापि खे

॥१२॥

॥१२॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दः कायस्य जिह्वा कुत्रापि विद्यते ॥ मनः कुत्रापि तत्त्यक्त्वा पुरु
षार्थे स्थितः सुखम् ॥ २ ॥ कृतं किमपि नैव स्यादिति संचिंत्य तत्व
तः ॥ यदा कर्त्तुमायाति मत्कृत्वा से मथा सुखं ॥ ३ ॥ कर्म नैष्कर्म
निर्बंधभावाद्देहस्थ योगिनं ॥ संगात्संयोगविरहाद्देहमासेय
श्री सुखं ॥ ४ ॥ अर्थानर्थौ न मे स्थित्या गत्या वा शयनेन वा ॥ ति
ष्ठान्नु स्वप्नस्तस्माद्देहमासे यथा सुखं ॥ ५ ॥ स्वपतो नास्ति
हानिर्मे सिद्धियत्नवतो न वा ॥ नाशोल्लासौ विहायास्माद्दे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मासेयथास्करवं॥ ६॥ स्करवादिरूपानियमं भावेषालोकयाकारिणः॥
शुभाशुभेविहामास्मादहमासेयथास्करवं॥ ७॥ ॥ इतियथास्करव
सप्तमं॥ ॥ प्रकृत्याश्रन्यचित्तोमः प्रमादाद्भवभावनः॥ निद्रितो बो
धितइवक्षीणः संसारिणोहिसः॥ १॥ क्वधनानिक्वमित्राणिक्वमे
विषयदस्यवः॥ क्वशास्त्रंक्वचविज्ञानंयदामेगलितास्टहा॥ २॥
विज्ञानेसाक्षिपुरुषेपरमात्मनिचेश्वरे॥ नैराश्येबंधमोक्षे
चनचित्तामुक्तयेमम॥ ३॥ अंतर्विकल्पशून्यस्यबाहिःस्वछं
दचारिणः॥ भ्रांतस्येवदशास्तास्तास्तादृशाएवजानते॥ ४॥ ॥

॥१३॥

॥१३॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ॥इतिशांतिचतुष्कं॥ ॥ यथायथोपदेशेनकृतार्थः सत्वबुद्धिमान्॥
आजीवमपिजिज्ञासुः परस्तत्रविमुच्यति॥१॥ मोक्षोविषयवैरस्यं बंधो
विषयेकोरसः॥ एतावदेवजिज्ञानयथेच्छसितथाकुरु॥२॥ वाग्मिप्राज्ञ
महोद्योगंजनंसृक्कजडालसं॥ करोतितत्वबोधोयमतस्त्यक्तोबुभु
क्षुभिः॥३॥ नत्वंदेहोनतेदेहोभोक्ताकर्त्तानवाभवान्॥ चिद्रूपोसि
सदासाक्षीनिरपेक्षःसुखंचर॥४॥ रागद्वेषौमनोधर्मौनिमस्तेक
दाचन॥ निर्विकल्पोसिबोधात्मन्सर्वभूतानिचात्मनि॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विज्ञाय निरहंकारो निर्ममस्त्वं सुखी भव॥ ६॥ विश्वं स्फुरति यत्रेदं तरंगा
इव सागरे॥ तत्त्वमेव न संदेह श्चिन्मूर्त्ते विज्वरो भव॥ ७॥ श्रद्धत्स्वा ता
त श्रद्धस्व नात्र मोहं कुरुष -- भो ज्ञानस्वरूपो भगवानात्मत्वं प्रकृ
तेः परः॥ ८॥ गुणैः संवेष्टितो देह स्तिष्ठत्या याति --- याति आत्मा
नगंता नागंता किमेनमनुशोचसि॥ ९॥ देहस्तिष्ठतु कल्पांतं गच्छ
त्वद्यैव वा पुनः॥ कृ वृद्धिः क्व च वा हानि स्तव चिन्मात्ररूपिणः॥ १०॥
त्वय्यनंते महाभोधौ विश्ववीचीस्वभावतः॥ उदेतु वास्तमायातु
नते वृद्धिर्न वा क्षतिः॥ ११॥ ता ता चिन्मात्ररूपोसि नते भिन्नमि





CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंजगत्॥ अतः कस्य कथं कुत्र हेयोपादेयकल्पना॥ १२॥ एकस्मिन्न
व्यये शांते चिदाकाशे मले त्वयि॥ कुतो जन्म कुतः कर्म कुतोहंकार ए
व च॥ १३॥ यत्त्वं पश्यसि तत्रैकस्त्वमेव प्रतिभाससे॥ किंपृथग्भास
ते स्वर्णात् कटकांगदनूपुरं॥ १४॥ अयं सोहमयं नाहं विभागमिति संत्य
ज॥ सर्वमात्मेति निश्चित्य निःसंकल्पः सुखी भव॥ १५॥ तवैवाज्ञा
नतो विश्वं त्वमेकः परमार्थतः॥ त्वत्तोन्यो नास्ति संसारी नासंसारी
च कश्चन॥ १६॥ भ्रांतिमात्रमिदं विश्वं न किंचिदिति निश्चयी॥ नि
र्वासनः स्फूर्तिमात्रो न किंचिदिव शाम्यति॥ १७॥ एक एव भवांभो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धावासीदस्तिप्रविष्यति॥ नतेबंधोस्तिमोक्षोवाकृतकृत्यः सुखं
चर॥१८॥ मासंकल्पविकल्पाभ्यांचित्तंक्षोभयचिन्मय॥उपशा
म्यसुखंतिष्ठस्वात्मन्यानंदविग्रहे॥१९॥ त्यजावधानंसर्वत्रमाकं
चिद्धृदिधारय॥-आत्मा त्वंमुक्त एवासिकं विमृश्यकरिष्यसि॥
॥२०॥ ॥ इतितत्त्वोपदेशाविंशतिकं॥ ॥ आचक्ष्यश्रणुवातात
नानाशास्त्राण्यनेकशः॥ तथापिनतवस्वास्थ्यंसर्वविस्मर
णायते॥१॥ भोगंकर्मसमाधिंवाकुरुविज्ञतथापिते॥ चि

॥१५॥

॥१५॥

KKSU LIBRARY
RAMTEK
441106
M 1464
Dist Nagpur

29

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तं निरस्तसर्वाश्रमत्यर्थं रोचयिष्यति ॥२॥ आयासासकलो दुःखी
नैनं जानाति कश्चन ॥ अनेनैवोपदेशेन धन्यः प्राप्नोति निर्वृ
तिं ॥३॥ व्यापारे खिद्यते यस्तु निमेषोन्मेषयोरपि ॥ तस्यालस्यधु
रीणस्य सुखं नान्यस्य कस्यचित् ॥४॥ इदं कृतमिदं नेति द्वंद्वैर्मुक्तं
यदा मनः ॥ धर्मार्थकाममोक्षेषु निरपेक्षं तदा भवेत् ॥५॥ विरक्तो
विषयद्वेषी रागी विषयलोलयः ॥ ग्रहमोक्षविहीनस्तु न विरक्तो
न रागवान् ॥६॥ हेयोपादेयता तावत् संसारविटपांकुरः ॥ स्पृहा जी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=19.10.20 17:13
,TRANSFERRED=2020/10/19 at 17:17:28
,PAGES=30
,TYPE=STD
,NAME=S0004199
,Book Name=M-1461-TATVOPDESH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection